अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ............

**Paper Code**
**BC 102**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**
**एक वर्षीय ब्रिजकोर्स (सत्रम् : प्रथमम्)**
**संस्कृत (द्वितीयपत्रम्)**
**संस्कृत-व्याकरणम् (ख)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

---

**निर्देशः** अस्य प्रश्नपत्रस्य पञ्चसप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्ड-क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क' खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्ना एव समाधेयाः।** **(3×15=45)**

**1.** अधोलिखितेषु पञ्चसूत्राणां व्याख्या करणीया -
एओङ्, लण्, घढधष्, खफछठथचटतव्, अइउण्, शषसर् ।

**2.** अधोलिखितेषु त्रयाणां सूत्राणां व्याख्या करणीया -
अदसो मात्, इको झल्, अपृक्त एकाल्प्रत्ययः, ज्ञाश्रुस्मृदृशां सनः, यचि भम् ।

**3.** अधोलिखितेषु शब्देषु द्वयोः शब्दयोः सिद्धिः करणीया -
यागः, अकृत, गौर्यैः, पचामि।

**4.** अधोलिखितेषु पञ्चानां सूत्राणां समासः करणीयः -
नेयङुवङ्स्थानावस्त्री, स्वरितञितः कर्त्रभिप्राये क्रियाफले, क्ङिति च,
स्थानिवदादेशोऽनल्विधौ, ऊकालोऽज्झस्वदीर्घप्लुतः, प्रोपाभ्यां समर्थाभ्याम्।

**5.** अधोलिखितेषु सूत्रेषु पञ्चसूत्राणामर्थो लेखनीयः -
एच इग्घ्रस्वादेशे, नाज्झलौ, पूङः क्त्वा च, लशक्वतद्धिते,
भीत्रार्थानां भयहेतुः, पतिः समासः एव ।

## खण्ड-ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख' खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वार एव प्रश्नाः समाधेयाः।** **(4×5=20)**

1. अधोलिखितानां सूत्राणां उदाहरणानि लिखन्तु-
शि सर्वनामस्थानम्। न लुमताङ्गस्य। पुमान् स्त्रिया। वा क्यषः। साधकतमं करणम्।
2. अधोलिखितानां सूत्राणां पदच्छेद-विभक्तिवचनं लेखनीयम् -
न वेति विभाषा। तस्मिन्निति निर्दिष्टे पूर्वस्य। एकविभक्ति चापूर्वनिपाते।
क्रीडोऽनुसम्परिभ्यश्च। णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने।।
3. अधोलिखितेषु प्रत्याहारेषु के के वर्णाः वर्तन्ते? इति लिखन्तु।
इक् । एच् । झश् । अट् । झल् ।
4. अधोलिखितेषु शब्देषु एकः शब्दः साधनीयः -
भूष्णुः । विश्वे । पठिता ।

5. अधोलिखितानां सञ्ज्ञानां सूत्राणि लिखन्तु –

| | | | | |
|---|---|---|---|---|
| घुः । | उदात्तः । | संयोगः । | घिः । | धातुः । |
| आत्मनेपदम्। | कर्म । | विभाषा । | लघु । | लोपः । |

6. अधोलिखितयोः सूत्रयोः व्याख्या करणीया –
सार्वधातुकमपित् । हलन्त्यम् ।

## खण्ड–ग
## (वस्तुनिष्ठ प्रश्न)

नोट : खण्डेऽस्मिन् दश वस्तुनिष्ठप्रश्नाः दत्ताः। प्रतिप्रश्नाय एकोऽङ्को निर्धारितोऽस्ति । **(10×1=10)**

1. कति प्रत्याहारसूत्राणि?
   (अ) द्वादश (ब) त्रयोदश
   (स) चतुर्दश (द) पञ्चदश
2. 'चिन्वन्ति' इति पदे गुणनिषेधस्य कारणं किम्................
   (अ) ङित्वम् (ब) कित्वम्
   (स) गित्वम् (द) निषेधत्वम्
3. 'टिदागमः' कुत्र भवति?
   (अ) षष्ठीनिर्दिष्टस्य अन्ते (ब) षष्ठीनिर्दिष्टस्य आदौ
   (स) षष्ठीनिर्दिष्टस्य मध्ये (द) कुत्रापि न
4. 'ड' इति वर्णस्य इत्संज्ञा केन सूत्रेण?
   (अ) लशक्वतद्धिते (ब) आदिर्ञिटुडवः
   (स) उपदेशेऽजनुनासिक इत् (द) चुटु
5. अधोलिखितेषु कस्य वर्णस्य गुणसंज्ञा वर्त्तते?
   (अ) अ (ब) इ
   (स) आ (द) औ
6. प्रयत्नं कति विधं भवति?
   (अ) त्रिविधम् (ब) चतुर्विधम्
   (स) द्विविधम् (द) पञ्चविधम्
7. अधोलिखितेषु कस्य शब्दस्य नदी संज्ञा वर्त्तते?
   (अ) गौरी (ब) गुरूः
   (स) रमा (द) हरिः
8. 'खर्' इति प्रत्याहारे कौ द्वौ वर्णौ भवतः?
   (अ) ज, द (ब) छ, क
   (स) म, न (द) ह, व
9. अष्टाध्याय्याः प्रथमाध्यायस्य द्वितीये पादे कति सूत्राणि?
   (अ) द्विसप्ततिः (ब) सप्ततिः
   (स) त्रिसप्ततिः (द) चतुस्सप्ततिः
10. मिदागमः कुत्र भवति?
    (अ) अन्त्यादचः परः (ब) अन्त्यादचः पूर्वः
    (स) अन्त्याद् हलः परः (द) अन्त्याद् हलः पूर्वः

--------------x--------------